# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| | | |
|---|---|---|
| कक्षा– शास्त्रिप्रथमवर्षम् (SEM-1) | प्रश्नपत्र–४ | गुणाः – ७० |
| विषयः– कर्मकाण्डम् (पौरोहित्यम् ) | O.E. 1.1.1. | समयः – ११:३० तः ०२:३० |
| दिनाङ्कः – १२/१०/२०१९ | सन्दर्भग्रन्थः – सर्वदेवपूजाप्रयोगः | |

**॥ प्रथमान्वितिः ॥**

**प्र–१ कयोश्चित् द्वयोः मन्त्रयोः ससन्दर्भं व्याख्या कार्या । ०८**

(१) ॐ शतमिन्नु शरदोऽअन्ति देवा यत्रा नश्चका जरसं तनूनाम् ।
पुत्रासो यत्र पितरो भवन्ति मानो मध्या रीरिषतायुर्गन्तोः ।

(२) ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्वः प्रसव उत्पुनाम्यच्छद्रेण पवित्रेण सूर्यस्य रश्मिभिः ।
तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पूने तच्छकेयम् ॥

(३) देवानाम्भद्रासुमतिर्ऋजूयतान्देवाना ँ रातिरभिनोनिवर्तताम् ।
देवाना ँ सक्ख्यमुपसेदिमां व्वयन्देवानऽआयुः प्प्रतिरन्तु जीवसे ॥

**प्र–२ सुमुखश्चैकादि विलिख्य प्राणायाममहत्त्वं लिखन्तु । ०८**

**अथवा**

**कङ्कणबन्धनप्रयोगः वेदोक्तपुराणोक्तेन विलिख्य सूर्यदीपपूजनमहत्त्वं लिखतु ।**

**प्र–३ कयोश्चित् द्वयोः टिप्पणीं कुरुत । ०४**

(१) प्राणायामः। (२) दिपपूजनम् । (३) शंखपूजनम् ।

**प्र–४ केषाञ्चित् पञ्चानां लघूत्तराणि देयानि । ०५**

१. आ नो भद्राः इति शब्दस्य अर्थं लिखतु ।
२. स्वस्ति न इन्द्रो... इति मन्त्रे कति वारं स्वस्तिशब्दः ?
३. यदाबध्नन् इति मन्त्रस्य प्रयोजनं किम् ?
४. आरोग्यं केन देवेन प्राप्यते ?
५. आचमनं कति वारं भवति ?
६. प्राणायामः कति प्रकाराः सन्ति ? के च ते ?
७. यजमानपत्न्याः कङ्कणबन्धनं कस्मिन्हस्ते भवति ?

**॥ द्वितीयान्वितिः ॥**

**प्र–५ कयोश्चित् द्वयोः मन्त्रयोः ससन्दर्भं व्याख्या कार्या । ०८**

१. रक्षोहा विश्वचर्षणि रभियोनि मयो हते ।
द्रोणे सधस्थ मासदत् ॥

२. तत्वायामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।
अहेडमानो व्वरुणे ह बोध्युरुष ँ समान आयुः प्रमोषीः ॥

३. आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्ययेन सविता रथेना देवो याति भुवनानि पश्यन् ॥

**प्र-६ दिग्रक्षणं कैः मन्त्रैः क्रियते** **०८**

**अथवा**

**प्रधानसङ्कल्पः लेख्यः ??**

**प्र-७ एकस्य टिप्पणी कार्या ।** **०२**

१. कलशस्थापनम् । (२) गणपतिपूजनम् ।

**प्र-८ कयोश्चित् द्वयोः लघूत्तरौ देयौ ।** **०२**

१. सङ्कल्पे पञ्चाङ्गस्य प्रयोगं लिखतु ।

२. चतुर्दिक्षु कलशस्य केषां पूजनं भवति ?

३. पञ्चायतनदेवानां नामानि लिखन्तु ।

४. सर्षप इत्याख्यस्य विनियोगः कुत्र भवति ?

**॥ तृतीयान्वितिः ॥**

**प्र-९ कयोश्चित् द्वयोः ससन्दर्भं व्याख्या कार्या ।** **०८**

१. पुरुषऽएवेद ँ सर्वं यद्भूतँ यच्च भाव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

२. तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम् ।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये ॥

३. पञ्च नद्यः सरस्वतीमपि यन्ति सस्रोतसः ।
सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥

**प्र-१० समीक्षा कार्या ।** **०८**

१. षोडशोपचारपूजनम् ।

अथवा

२. पूजायाः प्रयोगे आवश्यकसामग्र्यः ।

**प्र-११ द्वयोः टिप्पणी कार्या ।** **०४**

१. स्नानप्रकाराः ।

२. पूजासमये स्नानम् ।

३. देवस्य शुद्धोदकस्नानप्रयोगः ।

४. देवस्य यज्ञोपवीतम् ।

**प्र-१२ पञ्चानां लघूत्तराणि लिखन्तु ।** **०५**

(१) गन्धोदकमिति किम् ?

(२) सौभाग्यसूचकं द्रव्यं किम् ?

(३) 'अहिः' शब्दस्य कोऽर्थः ?

(४) नैवेद्यान्ते कः उपचारः ?

(५) 'यत्पुरुषं व्यदधुः' इति मन्त्रः कस्य उपचारो वर्तते ?

(६) प्रदक्षिणायां पदे पदे कस्य नाशो भवति ?

(७) 'सुजातो' इति मन्त्रः कस्य पदार्थस्य मन्त्रः अस्ति ?

---०००---